# Shri Sharada Devi Ashtakam

# श्रीशारदादेव्यष्टकम्

## Document Information

Text title : Shri Sharada Devi Ashtakam

File name : shAradAdevyaShTakam2.itx

Category : deities_misc, gurudev, rAmakRiShNa, aShTaka

Location : doc_deities_misc

Author : Durgadasa Goswami

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskrit**.

June 12, 2023

*sanskritdocuments.org*

# श्रीशारदादेव्यष्टकम्

पादाम्भोजरजः कणैर्वसुमतीं कृत्स्नां पुनन्ती स्वकै-
जाता या शुभलक्षणा जनगणक्षेमाय सौम्याकृतिः ।
बङ्गान्तर्जयरामवाट्यभिहिते ग्रामे द्विजस्यान्वये
वन्दे तां खलु शारदामणिमहं श्रीरामकृष्णप्रियाम् ॥ १॥

यां मातां पथि दस्युरप्यवनतः क्रौर्यं निरस्यादवाद्
द्रागङ्गीकृतवांश्चिराय दुहितेत्याख्याय मोहात्ययात् ।
सेवाद्यैरचिरात् प्रसाद्य दयितस्थानं तथा नीतवान्
वन्दे तां खलु शारदामणिमहं श्रीरामकृष्णप्रियाम् ॥ २॥

पूर्वं कल्पितया विवाहविधये दैवेन सद्वृत्तया
बध्वा शिक्षितयात्मना स्वमनसो वाञ्छानुरूपं शनैः ।
शुद्धात्मापि पतिर्यया शुचितरो जातः कृतार्थोऽप्यहो
वन्दे तां खलु शारदामणिमहं श्रीरामकृष्णप्रियाम् ॥ ३॥

चित्रं भोः फलहारिणीतिथिरजन्यर्धे स्व सिद्धेः फलं
पूजान्ते पुरुषोत्तमेन गुरुणा यस्यै रहस्यार्पितम् ।
षोडश्यै विधिवत् त्रिलोकजननी बुद्ध्या जपाक्षस्रजा
वन्दे तां खलु शारदामणिमहं श्रीरामकृष्णप्रियाम् ॥ ४॥

यस्या नो द्विजते स्म जीवनिवहः शिष्या नरेन्द्रादयः ।
प्राप्याज्ञामपि सम्भ्रमादपि भयात् प्रीत्यान्वतिष्ठन्नपि ।
लीयन्ते रिपवः प्रणश्यति भवः शान्तिश्च सञ्जायते ।
वन्दे तां खलु शारदामणिमहं श्रीरामकृष्णप्रियाम् ॥ ५॥

सेवाप्रेम दयात्रपामति कथा यस्याः परं गीयते ।
श्रद्धाभक्तिभराज्जनैरहरहः पारेऽब्धि राष्ट्रेष्वपि ।
कारुण्यं नयनेऽभयं करतले मुक्तिश्च पादाम्बुजे ।
वन्दे तां खलु शारदामणिमहं श्रीरामकृष्णप्रियाम् ॥ ६॥

यस्यां स्नेहनिधौ प्रकामविनताः सौजन्यमुग्धान्तराः ।
साध्वीसङ्घशिरोमणौ पृथुतपो निष्ठाम्बुधौ सज्जनाः ।
स्वेषामादधति प्रसन्नवदनाः सर्वस्वमप्यार्तितो ।
वन्दे तां खलु शारदामणिमहं श्रीरामकृष्णप्रियाम् ॥ ७॥

मातर्मातरये ! कृपामयि ! धरोद्धारार्धमभ्यागते !
त्रायस्वेह सुताननाथपतितांस्तत्पादपद्माश्रितान् ।
सम्प्रार्थ्यैति वरं क्रमादुपगताः प्राच्याः प्रतीच्याश्च यां
वन्दे तां खलु शारदामणिमहं श्री रामकृष्णप्रियाम् ॥ ८॥

श्री शारदाफुल्लपदारविन्दे लग्नो यथालिर्मकरन्दमत्तः
अत्याल्पधी-मातृकृपार्थि-दुर्गादासास्तृतोऽस्तु स्तव एष शस्तः ॥ ९॥

इति अध्यापकश्रीदुर्गादासगोस्वामीविरचितं “श्रीश्रीशारदादेव्यष्टकम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Sharada Devi Ashtakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*